क्रं. ५०

वास्तुशांत.

सरस्वती.

पृ. २ पूर्ण

शके १७७१

इ. स. १८४९.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

श्रीगणेशायनमः अथसूत्रोक्तवास्तुशांतिप्रारंभः साचद्विजातीनांपूर्वोक्तयासमु
च्चीयते पूर्वोक्तायांत्वशक्तौस्वस्वसूत्रोक्तैवकार्या तथापिसिद्धेः येषांतुसूत्रंनास्ति
तेषांशूद्राणांचपूर्वोक्तैरेव तस्याःसर्वसाधारण्येनविधानात् अतश्चनशूद्रमा
त्रविषयत्वं तस्मात्सूत्रोक्तापूर्वयासमुच्चीयते तत्राश्वलायनीयगृह्योक्तायाःप्र
योगः काष्ठादिनिर्मितंसंपन्नंगृहंव्रीह्यादिबीजसंयुतंशोभनेमुहूर्तेब्राह्मणैः
सहतूर्यघोषंप्रविश्य अस्यवास्तोःसूत्रोक्तवास्तुशांत्यंगभूतंस्व०मातृ०नां०
करिष्ये शुचिदेशेचतस्रःशिलाःसंस्थाप्यतासुदूर्वानिधायतत्रमणिकसंज्ञं
मृद्भांडंस्थापयेदनेन दृथित्वाअधिसंभवति अरंगरोवावदीतित्रेधाबध्धो
वरत्रया इरामुहप्रशंसत्यनिरामपबाधतामितिवा ततोमणिकेजलमा
सिंचेदनेन ॐ ऐतुराजावरुणोरेवतीभिरस्मिंस्थानेतिष्ठतुमोदमानः इरां

(२)

वास्तुशांति १ वहंतोघृतमुक्षमाणा मित्रेणसाकंसहसंविशंत्विति ततस्तज्जलंपात्रांतरेआ
दायतत्रगंधदूर्वाःशमीशाखाउदुंबरशाखाव्रीहीन्यवान्फलंहिरण्यंचक्षि
प्त्वादूर्वाभिःशाखाभ्यांचसर्वगृहंप्रागादितःप्रदक्षिणंव्रजन्त्रिःप्रोक्षेद
नेनसूक्तेन शंनइंद्राग्नीइतिपंचदशर्चस्यसूक्तस्यवसिष्ठोविश्वेदेवा
स्त्रिष्टुप् प्रोक्षणेवि० सकृत्सकृत्पाठः ततःप्रागादितस्त्रिवारमविछिं
नामुदकधारांदद्यात् अनेनतृचेन आपोहिष्ठेतितृचस्यांबरीषःसिं
धुद्वीपआपोगायत्री धारायांवि० अस्यापिसकृत्पाठः ततोमध्येगृहं
गृह्यमग्निंप्रतिष्ठाप्य ममास्यवास्तोःशुभतासिध्यर्थंसद्यःकृतवास्तु
शांतिंकरिष्ये वास्तोष्पतिंचतुर्वारंचरुद्रव्येणेतिप्रधानंसंकीर्त्यान्वा राम
धायपूर्णपात्रनिधानांतंकृत्वा॰वदानधर्मेणचरुमवदाय वास्तोष्पत १
वास्तोष्पतयेचतुःकृत्वस्तूष्णींनिरूप्यतथैवप्रोक्ष्याज्यभागांतंकृत्वाऽ

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2A)

इतिचतुर्भिर्मंत्रैः स्वाहांतैर्जुहुयात् वास्तोष्पतइति चतसृणां वसिष्ठोवा
स्तोष्पतिस्त्रिष्टुप् अंत्यागायत्री होमेवि० वास्तोष्पतयइदंनममेतिसर्व
त्रत्यागः ततः स्विष्टकृदादिहोमशेषंसमाप्य शिष्टेनचरुणान्येनवान्नेन
शतंतदर्धंतदर्धंसामान्यपरिभाषयावऽऽवचनाद्शक्तस्त्रीन्वाब्राह्मणा
न्भोजयेत् चरोःपूर्वंतत्रान्यःपाकोनकार्यः ततःशिवंवास्त्विति शिवंवास्त्वि
तिभवंतोब्रुवंत्विति ब्राह्मणेभ्योब्रूयात् तैःशिवंवास्तुशिवंवास्त्वित्युक्तः
सुहृद्युक्तोभुंजीतेति विशीर्णगृहेसज्जीकरणप्येतद्दिष्यंतेसाधारण
शांतिवत् इतिसूत्रोक्तवास्तुशांतिप्रयोगःसमाप्तः शाके१७०१शुक्ल

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. Joint project of the

(3)

सूत्रोक्त
२

वास्तुशांतिप्रयोगः

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

राम
२

# मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com